# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- नवम्बर/दिसम्बर-२०१६

कक्षा - **शास्त्री-०३ सेमेस्टर-०५** **प्रश्नपत्रम्- ०४** गुणाः - ७०

विषयः- संस्कृतसम्भाषणम् कोड - OE-3.5.5. समयः- ११:०० तः ०२:००

दिनाङ्कः - २८/११/२०१६ ग्रन्थः - विदुरनीतिः

---

**प्रथमान्वितिः (युनिट- १)**

**प्रश्नः १ द्वयोः पदच्छेदपूर्वकं सान्वयं भावार्थं कुरुत** **08**

(१). सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम्
सिखार्थीवा त्यजेद् विद्यां विद्यार्थी व त्यजेत् सुखम् ।

(२). बुद्ध्या भयं प्रण्दति तपसा विन्दते महत् ।
गुरुशुश्रूषया ज्ञानं शान्तिं योगेन विदन्ति।

(३). ईर्ष्यी धृणी न सन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते नित्यदुःखिताः ।।

**प्रश्नः २ निम्नलिखितयोः कस्यचिदेकस्य उत्तरं लिखतु ।** **08**

(१). विदुरनीत्यनुसारं सत्पुरुषाशीलस्य निरूपणं क्रियताम्।

(२). विदुरनीत्यनुसारं मितभोजनस्य गुणान् निरूपयत।

**प्रश्नः ३ द्वयोः टिप्पणी कार्या ।** **04**

(१) अभिवादनशीलः वर्धते (३) सुभाषिता वाक्

(२) शान्तो हि पण्डितः (४) शीलं प्रधानम्

**प्रश्नः ४ पञ्चानामुत्तराणि लिखत ।** **05**

(१) कः श्रियो वधः ?

(२) कैः मैत्रीं समाचरेत् ?

(३) किं न संरोहति?

(४) कति अग्नयो मनुष्येण परिचर्याः?

(५) कैः सह विरोधः न कर्तव्यः ?

(६) के अकस्मादेव कुप्यन्ति ?

(७) कौ पुरुषौ स्वर्गस्योपरि तिष्ठतः ?

**द्वितीयान्वितिः (युनिट- २)**

**प्रश्नः ५ द्वयोः पदच्छेदपूर्वकं सान्वयं भावार्थं कुरुत** **08**

(१) समृद्धाः गुणतः केचिद् भवन्ति धनतोऽपरे
धनवृद्धान् गुणैर्हीनान् धृतराष्ट्र विवर्जय

(२) अन्यो धनं प्रत्यगतस्य भुङ्क्तेवयांसि चाऽग्निश्च शरीरधातून्
द्वाभ्यामयं सह गच्छत्वमुत्र पुण्येन पापेन च वेष्ट्यमानः

(३) विद्याशीलवयोवृद्धान् बुद्धिवृद्धांश्च भारत
धनाभिजातवृद्धांश्च नित्यं मूढोऽवमन्यते ।

**प्रश्नः ६ निम्नलिखितयोः कस्यचिदेकस्य उत्तरं लिखत। 08**

(१) पुण्यो हि अलोभः आत्मा इत्येतत् स्पष्टयत।

(२) सन्तापात् किं किं भ्रश्यते इति विदुरनीतिमनुसृत्य लिख।

**प्रश्नः ७ द्वयोः टिप्पणी कार्या।** 04

(१) कीर्तिमान् महीयते (३) कल्याणे मनः कुर्यात्

(२) धृतिमयी नौका (४) किं केन जयेत्

**प्रश्नः ८ निम्नेषु पञ्चानामुत्तराणि लिखत। 05**

**(१)** के मृतकल्पाः भवन्ति ?

**(२)** छिद्रोदकुम्भात् किं स्रवते?

**(३)** नरकस्य द्वारं कतिविधम्?

**(४)** कः श्रियं हरति?

**(५)** कति श्रियः समिधः ?

**(६)** धर्मस्य मार्गः कतिविधः ?

**(७)** कीदृशं धनं हेयम्?

**तृतीयान्वितिः (युनिट - ३)**

**प्रश्नः ९ द्वयोः पदच्छेदपूर्वकं सान्वयं भावार्थं कुरुत 08**

(१) पितृपैतामहं राज्यं प्राप्तवान् स्वेन कर्मणा
वायुरभ्रमिवाऽऽसाद्य भ्रंशयत्यनये स्थितः ॥

(२) एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः ॥

(३) यथा मधु समादत्ते रक्षन् पुष्पाणि षट्पदः
तद्वदर्थान् मनुष्येभ्यः आदद्यादविहिंसया ॥

**प्रश्नः १० निम्नलिखितयोरेकस्य उत्तरं लिखत। 08**

(१) विदुरनीत्यनुसारं अनर्थाः आत्मवन्तं प्रजहतीति निरूपयत।

(२) विदुरनीत्यनुसारं भृत्यवात्सल्यं निरुपयत

**प्रश्नः ११ एकस्य टिप्पणी कार्या। 02**

(१) चारचक्षुः भवेत् नृपः

(२) लोकरञ्जकः

**प्रश्नः १२ निम्नेषु द्वयोः लघूत्तरं लेख्यम्। 02**

१. किदृशः वक्ता श्रोता च दुर्लभः?

२. राजा प्रथमं कं जयेत्?

३. दीनसेवया किं अश्नुते?

४. काः गृहस्य श्रियः उक्ताः ?

***